चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्द्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्व्वपेत् तस्य जुहुयात् कामाय स्वाहा कामकामाय स्वाहा। नैर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहा इति एतदेव रेतसः प्रयत्नोत्सर्गे दिवा स्वप्ने व्रतान्तरेषु च"। आसमावर्त्तनाद्रेतो विसर्गे दिवास्वप्ने चाभ्यासे ज्ञेयम्। पशोरभावे नैर्ऋतं चरुं निर्वपेदित्यर्थः। एतच्चामावास्यायां कर्त्तव्यमित्याह बौधायनः। "अथावकीर्ण्यमावस्यायां निश्यग्निमुपसमाधाय संपरिस्तीर्य्य दार्व्वीं हौमिकीं परिचेष्टां कृत्वा द्वे आज्याहुती जुहुयात्"। अत्र च व्रतान्तरेष्वित्यभिदधता वशिष्ठेन द्वादशाहादिकव्रतेषु पुण्यार्थचान्द्रायणादिषु च यथातिदिष्टं तथाचैतदतिदिष्टमविशेषात्। अतएव "कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः। अतिक्रमं व्रतस्याहुर्धर्म्मज्ञा ब्रह्मवादिनः" इति मनुना सामान्येनैवावकीर्णिलक्षणमन्वकारि अकामतो रेतसः स्रावे मनुः "स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्च्चयित्वा तु पुनर्म्मामित्यृचं जपेत्"। ब्रह्मचारिणो गुरुदारगमने तु तद्गमनोक्तप्रायश्चित्तेनैव गुरुणा लब्धावकीर्णिप्रायश्चित्तं कृतम्भवेत्। यथा दण्डनिपातप्रायश्चित्तेनैव गुरुणा तन्नान्तरीयकावगोरणप्रायश्चित्तं सम्पद्यते"।

**क्षतहर** न० क्षतं हरति हृ—हेतौ ट। क्षतहरणहेतौ १अगुरुचन्दने शब्दच०। २क्षतहारकमात्रे त्रि०

**क्षताशौच** न० क्षतनिमित्तमशौचम्। व्रणादिक्षतकृते स्मृत्युक्ते अशौचे। "सव्रणः सूतकी सूयी मत्तोन्मत्तरजस्वलाः। सूतबन्धुरबन्धुश्च वर्ज्यान्यष्टौ स्वकालतः" प्रा०त० देवलः। अशुचित्वमप्याह तत्रैव स एव। "दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत्। न तत्र बहुशः कुर्य्यात् यत्नमुद्धरणे पुनः। भवेदशौचमत्यन्तं तृणवेधात् व्रणे कृते"। तृणवेधादित्युपलक्षणं व्रणहेतुजनमात्रस्य। अस्यापवादः "चन्द्रसूर्य्यग्रहे चैव मृतानां पिण्डकर्म्मणि। महातीर्थे तु संप्राप्ते क्षतदोषो न विद्यते" प्रा०त० पुलस्त्यः। मृतानां पिण्डकर्म्मणि निरवकाशत्वात् पितापिण्डोदकदानादौ। संप्राप्ते नियतवासादिना सम्यक्प्राप्ते।

**क्षति** स्त्री क्षण-क्तिन्। १हानौ, २अपचये ३क्षये च। "हयानां न क्षतिः काचिन्न रथस्य न मातलेः" भा० व० १७२अ०। "द्विषां क्षतीर्य्या प्रथमे शिलीमुखाः" किरा०

**क्षतोदर** क्षतजाते उदररोगभेदे उदरशब्दे ११५० पृ० विवृतिः। शल्यमित्यादि तत्रत्यं सुश्रुतवाक्यं भावप्र० व्याख्याय चरकमुनि सम्मतिप्रदर्शनेन विशेष उक्तो यथा "शल्यं कण्टककर्क्करादि। अन्नोपहृतं भुक्तं यत् अन्त्रं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं, शर्क्कराभिरितरथापि यदन्त्रं भिनत्ति तत्। उपलक्षणम्। जृम्भणमत्यशनं वा यदन्त्रम्भिनत्ति। यतउक्तञ्चरकेण शर्करातृणकाष्ठास्थिकण्टकैरन्नसंयुतैः। भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन चेत्"। तस्मात् भिन्नादन्त्रात्। गुदतस्तु भूयः अन्त्रात्संस्रुत्य पुनर्गुदतः स्रवेदित्यर्थः। दाल्यति विदार्य्यत एव। पदसिद्धिरार्षत्वात्। एतत् क्षतोदरन्तन्त्रान्तरे परिस्राव्युदरमादिष्टम्"

**क्षत्तृ** पु० स्त्री० क्षद-संवृतौ संज्ञायाम् तृच् अनिट्। १सारथौ २द्वाःस्थे ३क्षत्रियायां शूद्रेण जाते वर्णसङ्करे पुंस्त्री० अमरः स्त्रियां ङीप्। ४दासीपुत्रे ५नियुक्ते ६वेधसि पु० मेदि० ७मत्स्ये संक्षिप्तसा०। उपधादीर्घविधौ क्षत्तृशब्दस्य पृथग्ग्रहणात् औणादिकतृजन्तस्यान्यस्य निषेधेऽपि दीर्घः क्षत्तारौ "क्षत्तारौ ते प्रजापते। ताविहावतां स्फातिम्" २,२४,७, "यत् क्षत्तारं ह्वयत्या" अथ० ८,६,४९, आविक्षितस्याग्निः क्षत्ता विश्वे देवाः सभासदः" शत०ब्रा० १३, ५,४,६, "विविक्त्यै क्षत्तारम्" यजु० ३०,१३, । "क्षत्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च" या० उक्तेः "शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः। एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ। क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि जन्मनि" मनूक्तेश्च क्षत्रियायां विप्राज्जात इति अमरमतत्वेन शब्दक० उक्तिः प्रामादिकी। "क्षत्ता स्यात् सारथौ द्वाःस्थे, क्षत्रियायाञ्च शूद्रजे" इति नानार्थेऽमरोक्तेः मनुयाज्ञवल्क्यवाक्यादिसंवादाच्च "माहिष्योऽर्य्यक्षत्रिययोः क्षत्तार्य्याशूद्रयोः सुतः" इत्यमरोक्तौ अर्य्याशूद्रजातस्य क्षत्तृत्वोक्तावपि तत्र अर्य्यां स्वामिनी योग्यत्वात्तत्र क्षत्रिया, तेन न पूर्व्वापरविरोध इति भानुदीक्षितव्याख्या। अतएव मेदिन्याम् "क्षत्ता शूद्रक्षत्रियाजे प्रतीहारे च सारथौ। भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्"। तस्य वृत्तिमाह मनुः "क्षत्त्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम्"। तत्र दासीपुत्रे "ततः प्रीतमनाः क्षत्ता (विदुरः) धृतराष्ट्रं विशाम्पते!। उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः। वैचित्रवीर्य्यस्तु नृपो निशम्य विदुरस्य तत्" भा०आ०२००अ०। विदुरस्य दासीपुत्रत्वं विदुरशब्दे वक्ष्यते "ततोऽपश्यत्